# संस्कृतशिक्षणसन्दर्भे बहुमाध्यमपुञ्जस्य प्रभावः

डॉ.रमणमिश्रः
वरिष्ठशोधाध्येता
संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
ramanmishra869@gmail.com

**(शोधसारांशः)**

सर्वस्यापि अनुसन्धानस्य निष्कर्षाणां, सामान्यीकरणानाञ्च प्रस्तुतीकरणं भवति एव । एतदेकं महत्त्वपूर्णचरणं वर्तते। समस्तानुसन्धानस्य उपयोगितायाः, प्रभाव-शीलतायाश्च मूल्याङ्कनस्य अयमेव आधारः यदनुसन्धाने प्राप्तव्योद्देश्यानाम् अनुरूपेण प्राप्तिरभवत् उत ना? अस्मिन्नध्याये मूलभूतपरिणामाः प्रस्तूयन्ते। अत्र निष्कर्षनिरूपणस्य प्रक्रियायां यथा प्राक्कल्पनाः अभिकल्पिताः आसन्, तथैव क्रमशः प्रस्तूयन्ते। सर्वम् आहत्य चत्वारः निष्कर्षाः प्रतिपादिताः। तदनन्तरम् अस्यानुसन्धानस्य सामान्यीकरणं निरूपितमपि निरूप्यते। अध्यायस्य अन्ते भाव्यनुसन्धानहेतु: केचित् परामर्शा: अपि प्ररूपिताः।

## निष्कर्षनिरूपणम्

कस्मिञ्चित् अपि अनुसन्धाने प्राप्तानां प्रदत्तानां यथाविधि विश्लेषणस्य अनन्तरं संश्लेषणमपि आवश्यकम्। संश्लेषणं नाम अनुसन्धाने विश्लेषिततथ्यानां सूत्रात्मकं संक्षिप्तञ्च निरूपणमिति। अनेन क्रमेण प्रस्तुतानुसन्धाने प्राप्तप्रदत्तानां विश्लेषणस्य च अनन्तरं निष्कर्षनिरूपणम् अनुष्ठीयते। निष्कर्षनिरूपणम् अत्र प्राक्कल्पनानुरूपेणैव ।

## प्राक्कल्पनाधारिता: निष्कर्षा:

प्राक्कल्पनानां परीक्षणाय कृतस्य विश्लेषणस्याधारेण निष्कर्षाः प्राप्यन्ते, यथा प्रथमाध्याये चत्वारः प्राक्कल्पना: अभिकल्पिता: तदनुक्रमेण चतुर्थाध्याये एतासां प्राक्कल्पनानां परीक्षणमपि विधत्तम्। पुनः इह तदनुगुणेन निष्कर्षाः दृष्टव्याः-

- मध्यमानश्रेणीमानस्य आधिक्येन निश्चयेन वक्तुं शक्यते यत् नियन्त्रितसमूहे पश्चपरीक्षणस्य स्पष्टप्रभावो वर्तते। निष्कर्षोऽयं प्राप्यते यत् संस्कृताधिगमे बहुमाध्यमपुञ्जस्य पद्धतेः प्रभावो भवति।
- मध्यमानश्रेणीमानस्य आधिक्येन निश्चयेन वक्तुं शक्यते यत् नियन्त्रणसमूहात् नियन्त्रितसमूहस्य संस्कृतविषयस्य उपलब्धिः अधिका वर्तते। निष्कर्षोऽयं प्राप्यते यत् संस्कृताधिगमे परम्परागतपद्धतितः बहुमाध्यमपुञ्जस्य पद्धतेः प्रभावोऽधिको वर्तते।
- नियन्त्रितसमूहस्य मध्यमानश्रेणीमानस्य आधिक्येन निश्चयेन वक्तुं शक्यते यत् नियन्त्रणसमूहात् नियन्त्रितसमूहस्य विषयवस्तुगतसंस्कृतविषयस्य उपलब्धिः अधिका वर्तते। निष्कर्षोऽयं प्राप्यते यत् संस्कृताधिगमे परम्परागतपद्धतितः बहुमाध्यमपुञ्जस्य पद्धतेः प्रभावोऽधिको वर्तते।
- नियन्त्रितसमूहस्य मध्यमानश्रेणीमानस्य आधिक्येन निश्चयेन वक्तुं शक्यते यत् नियन्त्रणसमूहात् नियन्त्रितसमूहस्य व्याकरणगतसंस्कृतविषयस्य उपलब्धिः अधिका वर्तते। निष्कर्षोऽयं प्राप्यते यत् संस्कृताधिगमे परम्परागतपद्धतितः बहुमाध्यमपुञ्जस्य पद्धतेः प्रभावोऽधिको वर्तते ।

## प्रतिक्रियाधारिता: निष्कर्षा:

प्रतिक्रियाधारितविश्लेषणस्य अनुरूपेण इह केचित् निष्कर्षाः प्राप्ताः। तदनुगुणेन निष्कर्षाः दृष्टव्याः-

- अभिवृत्तिपक्षे प्राप्तानुक्रियाणां विश्लेषणेन ज्ञायते यत् अधिकाः विद्यार्थिनः संस्कृताधिगमे बहुमाध्यमपुञ्जस्य प्रयोगं प्रति सम्मताः सन्ति। ते बहुमाध्यम-पुञ्जस्य प्रयोगं सकारात्मकम् अङ्गीकुर्वन्ति।

- प्रस्तुतिपक्षे प्राप्तानुक्रियाणां विश्लेषणेन ज्ञायते यत् अधिकाः विद्यार्थिनः संस्कृताधिगमे बहुमाध्यमपुञ्जस्य प्रयोगं प्रति सम्मताः सन्ति। ते बहुमाध्यम-पुञ्जस्य प्रयोगं सकारात्मकम् अङ्गीकुर्वन्ति।
- समग्रयोगात्मकदृष्ट्या प्राप्तानुक्रियाणां विश्लेषणेन अपि ज्ञायते यत् अधिकाः विद्यार्थिनः संस्कृताधिगमे बहुमाध्यमपुञ्जस्य प्रयोगं प्रति सम्मताः सन्ति। ते बहुमाध्यम-पुञ्जस्य प्रयोगं सकारात्मकम् अङ्गीकुर्वन्ति।
- पुनश्चायं निष्कर्षः प्राप्यते यत् बहुमाध्यमेन अध्ययनं रूचिकरं भवति इत्ययं कथनं प्रति विद्यार्थिनः पूर्णतः सम्मताः सन्ति। बहुमाध्यमप्रयोगकारणात् कक्षायां चित्तस्थिरतां, अध्ययनावश्यकतां, बहुमाध्यमेन अन्यपाठानाम् अवगन्तुं साहाय्यं, बहुमाध्यमेन अन्यपाठावबोधितुं प्रेरणां, संस्कृतपठनस्य सारल्यं च प्रति विद्यार्थिनः सम्मताः एव सन्ति।

## अनुसन्धानस्य सामान्यीकरणम्

सामान्यीकरणं नाम अनुसन्धानस्य निष्कर्षाणां जनसंख्यायां प्रति औचित्य-निर्धारणम् इति। प्रयोगाय सुनिश्चितसमूहस्य निष्कर्षाणामाधारेण कृतस्य सम्पूर्णशोधस्य परिणामानां सम्पूर्णजनसङ्ख्यायै अनुप्रयोजनीयता एव सामान्यीकरणमिति। अत्र यथा निष्कर्षा: निरूपिता:, तथैव सामान्यीकरणानि निरूप्यन्ते-

- प्रथमं सामान्यीकरणं यत् माध्यमिकस्तरे संस्कृताधिगमाय बहुमाध्यमपुञ्जस्य पद्धतिः प्रभावपूर्णा भवति।
- द्वितीयं सामान्यीकरणं यत् माध्यमिकस्तरे संस्कृताधिगमाय परम्परागत-व्याख्यानपद्धतितः बहुमाध्यमपुञ्जस्य पद्धतिः अधिका प्रभावपूर्णा भवति।
- तृतीयं सामान्यीकरणं यत् माध्यमिकस्तरे विषयवस्तुगतसंस्कृतविषयस्य संस्कृताधिगमाय परम्परागत-व्याख्यानपद्धतितः बहुमाध्यमपुञ्जस्य पद्धतिः अधिका प्रभावपूर्णा भवति।
- चतुर्थं सामान्यीकरणं यत् माध्यमिकस्तरे व्याकरणगतसंस्कृतविषयस्य संस्कृताधिगमाय परम्परागतव्याख्यानपद्धतितः बहुमाध्यमपुञ्जस्य पद्धतिः अधिका प्रभावपूर्णा भवति।

## अनुसन्धानस्य शैक्षिकनिहितार्थाः परामर्शश्च

अनुसन्धानस्य शैक्षिकनिहितार्थं नाम अनुसन्धानस्य व्यावहारिकोपयोगितायाः प्रतिपादनम्। अतः अनुसन्धानस्य अन्ते शैक्षिकनिहितार्थनां निरूपणं क्रियते। एतेषां निहितार्थनां सदुपयोगितानुरूपेण परामर्शाः प्रदीयन्ते। अतः सम्प्रति सम्पादितानुसन्धानस्य आधारेण तात्कालिकी दूरगामिनी च उपयोगिता प्रतिपाद्यते। शैक्षिकानुसन्धानस्य वस्तुतः एतन्महत्त्वपूर्णो विषयः। एतेषां निहितार्थानां द्विविधा उपयोगिता सिद्ध्यते- तात्कालिकम्, दूरगामिनी च। तात्कालिकोपयोगितायाः तात्पर्यं सम्बद्धसमस्यायाः समाधानप्राप्तिरिति, परिचयश्चेति। दूरगाम्युपयोगितायाः तात्पर्यं शोधसम्बद्धक्षेत्रेषु नवीननीतीनां, नियमानां, योजनानां, कार्यक्रमाणां, च सन्दर्भे वस्तुनिष्ठाधारणां, तर्काधाराणाञ्च स्थापनेति।

अथाग्रे निहितार्थनिरूपणं विधीयते-

- अनुसन्धानस्य प्रथमं निहितार्थं विद्यार्थिनां कृते वर्तते यत् अधिकोन्नतपरिणामानां कृते, विद्यार्थिनाञ्च कृते बहुमाध्यमपुञ्जोपयोगः व्यावहारिकः वर्तते। यथा अन्यविषयाणां कृते बहुमाध्यमसामग्री समुपलब्धास्ति, तथैव संस्कृताधिगमाय बहुमाध्यमस्य अनेकविविधानां रूपाणां प्रयोगाः प्रोत्साहनीयास्सन्तु। तथा च शैक्षणिकशिक्षणेतरगतिविधिनां नवीनसामग्रीप्रयोगः स्यात्, यथा- अन्तर्जाला-धारितप्रौद्योगिकीनाम् अनुप्रयोग:।
- अनुसन्धानस्य द्वितीयनिहितार्थम् अध्यापकानां विषये वर्तते यत् अध्यापकैः पुनः पुनः नवीनप्रौद्योगिकीन् प्रति जागरुकाः भवन्ति चेत् शिक्षणाधिगमप्रक्रिया समीचीना भवितुम् अर्हति। तथा च नित्यं स्वशिक्षणे अधिकाधिकं प्रौद्योगिकीनाम् अनुप्रयोगः स्यात् तर्हि अधिगमस्य विशिष्टा एव स्थितिर्भवितुमर्हति।

- अनुसन्धानस्य तृतीयनिहितार्थं शैक्षिकप्रौद्योगिकीनिर्माणविषये वर्तते यत् यथा संस्कृतसंवर्धनप्रतिष्ठानेन कृतं, क्रियते च, तथैव नितनूतनसामग्रीनिर्माणं स्यात्। विशेषतः प्रादेशिकसंस्थाभिः प्रादेशिकस्तरेषु बहुमाध्यमपुञ्जानां विकासः, समुचिता उपलब्धिसुनिश्चितता स्यात्।

## भाव्यनुसन्धानहेतुः परामर्शाः

पूर्वप्रकरणे केचित् परामर्शाः प्रस्ताविताः, ये आगामिभिः अनुसन्धानकर्तृभिः स्वीकर्तुं शक्यन्ते। अन्यचरैः साकमपि अनुसन्धानं भवितुमर्हति। अग्रे अनुसन्धानेभ्यः केचित् परामर्शाः प्रदीयन्ते-

- प्रादेशिकपाठ्यपुस्तकानां विषयवस्तुकेन्द्रितानां बहुमाध्यमपुञ्जानां विकासः, मूल्याङ्कनञ्च।
- इतरकक्षास्तरेषु बहुमाध्यमपुञ्जस्य विकासः, प्रभावशीलतायाः मूल्याङ्कनं च।
- अधिकनूतनप्रौद्योगिकीनाम् अनुप्रयोगेन प्रभाविबहुमाध्यमपुञ्जानां निर्माणम्।
- बहुमाध्यमपुञ्जस्य प्रभावशीलतायाः परीक्षणाय अनुदैर्घ्याध्ययनम्।
- दूरस्थ-निरौपचारिकसंस्कृतशिक्षासु प्रयुक्तबहुमाध्यमसामग्रीणां प्रभावशील-तायाः परीक्षणाय व्यक्तिवृत्ताध्ययनम्।
- स्वाध्यायकेन्द्रितविधिहेतुः प्रयुक्तप्रौद्योगिकीप्रभावस्य अध्ययनम्।

**(एषः शोधसारांशः "नवमीकक्ष्यायाः संस्कृतपाठ्यपुस्तकात् सञ्चितपाठाधारेण बहुपमाध्यनपुञ्जस्य विकसनं मूल्याङ्कनञ्च" इति विषयकस्य शोधस्य अस्ति । एतत् अनुसन्धानं विद्यावारिधेः उपाधेः कृते राष्ट्रियसंस्कृतसंस्थानस्य अधीने २०१५ - २०१८ वर्षमध्ये कृतम् ।)**

**सन्दर्भग्रन्थाः –**

☞ *डा. सन्तोषमित्तलः – संस्कृतशिक्षणम् , नवचेतना पब्लिकेशन्स,जयपुर,2006*
☞ *अरुण कुमार सिंह – उच्चतर सामान्य मनोविज्ञान, मोतीलाल बनारसीदास,2005*
☞ *जनार्दन हेगडे – शुद्धीकौमुदी, संस्कृतभारती, बेङ्गलूरु,2004*
☞ *गोविन्द तिवारी – शैक्षिक एवं मनोवैज्ञानिक अनुसंधान के मूलाधार,आगरा,1970*
☞ *एस.पी.कुलश्रेष्ठ – शैक्षिक तकनीकी के मूल आधार , अग्रवाल पब्लिकेशन्स, आगरा*
☞ *भोलानाथ तिवारी – भाषाविज्ञान, किताबमहल एजेन्सीज, इलाहाबाद*